# શ્રી લક્ષ્મી સહસ્રનામ સ્તોત્રં

નામ્નાં સાષ્ટસહસ્રં ચ બ્રૂહિ ગાર્ગ્ય મહામતે |
મહાલક્ષ્યા મહાદેવ્યા ભુક્તિમુક્તર્થસિદ્ધ્યે || ૧ ||
ગાર્ગ્ય ઉવાચ |
સનત્કુમારમાસીનં દ્વાદશાદિત્ય સન્નિભમ્ |
અપૃચ્છન્નોગિનો ભક્ત્યા યોગિનામર્થસિદ્ધ્યે || ૨ ||
સર્વલૌકિકકર્મભો વિમુક્તાનાં હિતાય વૈ |
ભુક્તિમુક્તિપ્રદં જપ્યમનુબ્રૂહિ દયાનિધે || ૩ ||
સનત્કુમાર ભગવન્ સર્વજ્ઞોઽસિ વિશેષતઃ |
આસ્તિક્કસિદ્ધ્યે નૃણાં ક્ષિપ્રધર્માર્થસાધનમ્ || ૪ ||
ખિદ્યંતિ માનવાઃ સર્વે ધનાભાવેન કેવલમ્ |
સિદ્ધ્યંતિ ધનિનોઽન્યસ્ય નૈવ ધર્માર્થકામનાઃ || ૫ ||
દારિદ્ર્યધ્વંસિની નામ કેન વિદ્યા પ્રકીર્તિતા |
કેન વા બ્રહ્મવિદ્યાઽપિ કેન મૃત્યુવિનાશિની ||૬||
સર્વાસાં સારભૂતૈકા વિદ્યાનાં કેન કીર્તિતા |
પ્રત્યક્ષસિદ્ધિદા બ્રહ્મન્ તામાચક દયાનિધે || ૭ ||
સનત્કુમાર ઉવાચ |
સાધુ પૃષ્ટં મહાભાગાઃ સર્વલોકહિતૈષિણઃ |
મહતામેષ ધર્મશ્ચ નાન્વેષામિતિ મે મતિઃ || ૮ ||
બ્રહ્મવિષ્ણુમહાદેવમહેંદ્રાદિમહાત્મભિઃ |
સંપ્રોક્તં કથયામ્યદ્ય લક્ષ્મીનામસહસ્રકમ્ || ૯ ||
યસ્કોચ્ચારણમાત્રેણ દારિદ્ર્યાન્મુચ્યતે નરઃ |
કિં પુનસ્તજ્જપાજ્ઞાપી સર્વેષ્ટાર્થાનવાપ્નુયાત્ || ૧૦ ||
અસ્ય શ્રીલક્ષ્મીદિવ્યસહસ્રનામસ્તોત્ર મહામંત્રસ્ય આનંદકર્દમચિક્કીતેંદિરાસુતાદયો મહાત્માનો મહર્ષયઃ અનુષ્ટુપ્પંદઃ વિષ્ણુમાયા શક્તિઃ મહાલક્ષ્મીઃ પરા દેવતા શ્રીમહાલક્ષ્મી પ્રસાદદ્વારા સર્વેષ્ટાર્થસિદ્ધ્યર્થે જપે વિનિયોગઃ | શ્રીમિત્યાદિ ષડંગન્યાસઃ |
ધ્યાનમ્ |
પદ્મનાભપ્રિયાં દેવીં પદ્માક્ષીં પદ્મવાસિનીમ્ |
પદ્મવક્તાં પદ્મહસ્તાં વંદે પદ્મામહર્નિશમ્ || ૧ ||
પૂર્ણેંદુવદનાં દિવ્યરત્નાભરણભૂષિતામ્ |
વરદાભયહસ્તાઢ્યાં ધ્યાયેચંદ્રસહોદરીમ્ || ૨ ||
ઇચ્છારૂપાં ભગવતઃ સચ્ચિદાનંદરૂપિણીમ્ સર્વજ્ઞાં સર્વજનનીં વિષ્ણુવક્ષઃસ્થલાલયામ્ | દયાળુમનિશં ધ્યાયેત્સુખસિદ્ધિસ્વરૂપિણીમ્ || ૩ ||
સ્તોત્રમ્ -
ઓં નિત્યાગતાઽનંતનિત્યા નંદિની જનરંજની |
નિત્યપ્રકાશિની ચૈવ સ્વપ્રકાશસ્વરૂપિણી || ૧ ||
મહાલક્ષ્મીર્મહાકાળી મહાકન્યા સરસ્વતી |
ભોગવૈભવસંધાત્રી ભક્તાનુગ્રહકારિણી || ૭||
ઈશાવાસ્યા મહામાયા મહાદેવી મહેશ્વરી |
હૃલ્લેખા પરમા શક્તિર્માતૃકાબીજરૂપિણી ||૩||
નિત્યાનંદા નિત્યબોધા નાદિની જનમોદિની |

સત્યપ્રત્યયની ચૈવ સ્વપ્રકાશાત્મરૂપિણી || ૪ ||
ત્રિપુરા ભૈરવી વિધ્યા હંસા વાગીશ્વરી શિવા |
વાગ્લેવી ચ મહારાત્રિઃ કાલરાત્રિસ્ત્રિલોચના || ૫ ||
ભદ્રકાળી કરાળી ચ મહાકાળી તિલોત્તમા |
કાળી કરાળવકાંતા કામાક્ષી કામદા શુભા ||૬||
ચંડિકા ચંડરૂપેશા ચામુંડા ચક્રધારિણી |
ત્રૈલોક્યજયિની દેવી ત્રૈલોક્યવિજયોત્તમા || ૭ ||
સિધ્દ્લક્ષ્મીઃ ક્રિયાલક્ષ્મીર્મોક્ષલક્ષ્મી પ્રસાદિની |
ઉમા ભગવતી દુર્ગા ચાંદ્રી દાક્ષાયણી શિવા || ૮ ||
પ્રત્યંગિરા ધરા વેલા લોકમાતા હરિપ્રિયા |
પાર્વતી પરમા દેવી બ્રહ્મવિધ્યાપ્રદાયિની || ૯ ||
અરૂપા બહુરૂપા ચ વિરૂપા વિશ્વરૂપિણી |
પંચભૂતાત્મિકા વાણી પંચભૂતાત્મિકા પરા || ૧૦ ||
કાળી મા પંચકા વાલ્મી હવિઃપ્રત્યધિદેવતા |
દેવમાતા સુરેશાના દેવગર્ભાંબિકા ધૃતિઃ || ૧૧ ||
સંખ્યા જાતિઃ ક્રિયાશક્તિઃ પ્રકૃતિર્મોહિની મહી |
યજ્ઞવિધ્યા મહાવિધ્યા ગુહ્યવિધ્યા વિભાવરી || ૧૨
જ્યોતિષ્મતી મહામાતા સર્વમંત્રફલપ્રદા |
દારિદ્રધ્વંસિની દેવી હૃદયગ્રંથિભેદિની || ૧૩ ||
સહસ્રાદિત્યસંકાશા ચંદ્રિકા ચંદ્રરૂપિણી |
ગાયત્રી સોમસંભૂતિઃ સાવિત્રી પ્રણવાત્મિકા || ૧૪ ||
શાંકરી વૈષ્ણવી બ્રાહ્મ સર્વદેવનમસ્કૃતા |
સેવ્યદુર્ગા કુબેરાક્ષી કરવીરનિવાસિની || ૧૫ ||
જયા ચ વિજયા ચૈવ જયંતી ચાડપરાજિતા |
કુબ્જિકા કાળિકા શાસ્ત્રી વીણાપુસ્તકધારિણી || ૧૬ ||
સર્વજ્ઞશક્તિઃ શ્રીશક્તિબ્રહ્મવિષ્ણુશિવાત્મિકા |
ઇડાપિંગળિકામધ્યમૃણાળીતંતુરૂપિણી || ૧૭ ||
યજેશાની પ્રથા દીક્ષા દક્ષિણા સર્વમોહિની |
અષ્ટાંગયોગિની દેવી નિર્બીજધ્યાનગોચરા || ૧૮ ||
સર્વતીર્થસ્થિતા શુધ્દ્ધા સર્વપર્વતવાસિની
વેદશાસ્ત્રપ્રભા દેવી ષડંગાદિપદક્રમા || ૧૯ || [પ્રમા]
શિવા ધાત્રી શુભાનંદા યજ્ઞકર્મસ્વરૂપિણી |
વ્રતિની મેનકા દેવી બ્રહ્માણી બ્રહ્મચારિણી || ૨૦ ||
એકાક્ષરપરા તારા ભવબંધવિનાશિની |
વિશ્વંભરા ધરાધારા નિરાધારાડધિકસ્વરા || ૨૧ ||
રાકા કુહૂરમાવાસ્યા પૂર્ણિમાડનુમતિર્દ્યુતિઃ |
સિનિવાલી શિવાડવશ્યા વૈશ્વદેવી પિશંગિલા || ૨૨ ||
પિપ્પલા ચ વિશાલાક્ષી રકો વૃષ્ટિકારિણી |
દુષ્ટવિદ્રાવિણી દેવી સર્વોપદ્રવનાશિની || ૨૩ ||
શારદા શરસંધાના સર્વશસ્ત્રસ્વરૂપિણી |

યુધ્દ્મધ્યસ્થિતા દેવી સર્વભૂતપ્રભંજની || ૨૪ ||
અયુધ્દ્મા યુધ્દ્રૂપા ચ શાંતા શાંતિસ્વરૂપિણી |
ગંગા સરસ્વતીવેણીયમુના નર્મદાપગા || ૨૫ ||
સમુદ્રવસનાવાસા બ્રહ્માંડશ્રેણિમેખલા |
પંચવક્કા દશભુજા શુધ્દ્સ્પટિકસન્નિભા || ૨૬ ||
રક્તા કૃષ્ણા સિતા પીતા સર્વવર્ણા નિરીશ્વરી |
કાળિકા ચક્રિકા દેવી સત્યા તુ વટુકાસ્થિતા || ૨૭ ||
તરુણી વારુણી નારી જેષ્ઠાદેવી સુરેશ્વરી |
વિશ્વંભરાધરા કર્ત્રી ગળાર્ગળવિભંજની || ૨૮ ||
સંધ્યારાત્રિદિવાજ્યોત્સા કલાકાષ્ઠા નિમેષિકા |
ઉર્વી કાત્યાયની શુભ્રા સંસારાર્ણવતારિણી || ૨૯ ||
કપિલા કીલિકાડશોકા મલ્લિકાનવમલ્લિકા |
દેવિકા નંદિકા શાંતા ભંજિકા ભયભંજિકા || ૩૦ ||
કૌશિકી વૈદિકી દેવી સૌરી રૂપાધિકાડતિભા
દિગ્વસ્રા નવવસ્રા ચ કન્યકા કમલોદ્ભવા || ૩૧ ||
શ્રીઃ સૌમ્યલક્ષણાડતીતદુર્ગા સૂત્રપ્રબોધિકા |
શ્રધ્દ્મા મેધા કૃતિઃ પ્રજ્ઞા ધારણા કાંતિરેવ ચ || ૩૨ ||
શ્રુતિઃ સ્મૃતિર્ધૃતિર્ધન્યા ભૂતિરિષ્ટિર્મનીષિણી |
વિરક્તિર્વ્યાપિની માયા સર્વમાયાપ્રભંજની || ૩૩ ||
માહેંદ્રી મંત્રિણી સિંહી ચેંદ્રજાલસ્વરૂપિણી |
અવસ્થાત્રયનિર્મુક્તા ગુણત્રયવિવર્જિતા || ૩૪ ||
ઈષણાત્રયનિર્મુક્તા સર્વરોગવિવર્જિતા |
યોગિધ્યાનાંતગમ્યા ચ યોગધ્યાનપરાયણા || ૩૫ ||
ત્રયીશિખા વિશેષજ્ઞા વેદાંતજ્ઞાનરૂપિણી |
ભારતી કમલા ભાષા પદ્મા પદ્મવતી કૃતિઃ || ૩૬ ||
ગૌતમી ગોમતી ગૌરી ઈશાના હંસવાહની |
નારાયણી પ્રભાધારા જાહ્નવી શંકરાત્મજા || ૩૭ ||
ચિત્રઘંટા સુનંદા શ્રીર્માનવી મનુસંભવા |
સ્તંભિની કોભિણી મારી ભ્રામિણી શત્રુમારિણી || ૩૮ ||
મોહિની દ્વેષિણી વીરા અઘોરા રુદ્રરૂપિણી |
રુકાદશિની પુણ્યા કલ્યાણી લાભકારિણી || ૩૯ ||
દેવદુર્ગા મહાદુર્ગા સ્વપ્નદુર્ગાડષ્ટભૈરવી |
સૂર્યચંદ્રાગ્નિરૂપા ચ ગ્રહનક્ષત્રરૂપિણી || ૪૦ ||
બિંદુનાદકળાતીતા બિંદુનાદકળાત્મિકા |
દશવાયુજયાકારા કળાષોડશસંયુતા ||૪૧ ||
કાશ્યપી કમલાદેવી નાદચક્રનિવાસિની |
મૃડાધારા સ્થિરા ગુહ્યા દેવિકા ચક્રરૂપિણી ||૪૨ ||
અવિદ્યા શાર્વરી ભુંજા જંભાસુરનિબર્હિણી |
શ્રીકાયા શ્રીકલા શુભ્રા કર્મનિર્મૂલકારિણી || ૪૩ ||
આદિલક્ષ્મીર્ગુણાધારા પંચબ્રહ્માત્મિકા પરા |

શ્રુતિર્બ્રહ્મમુખાવાસા સર્વસંપત્તિરૂપિણી ||૪૪ ||
મૃતસંજીવની મૈત્રી કામિની કામવર્જિતા |
નિર્વાણમાર્ગદા દેવી હંસિની કાશિકા ક્ષમા || ૪૫ ||
સપર્યા ગુણિની ભિન્ના નિર્ગુણા ખંડિતાઽશુભા |
સ્વામિની વેદિની શક્યા શાંબરી ચક્રધારિણી
દંડિની મુંડિની વ્યાઘ્ર શિખિની સોમસંહતિઃ |
ચિંતામણિશ્ચિદાનંદા પંચબાણપ્રબોધિની || ૪૭ ||
બાણશ્રેણિઃ સહસ્રાક્ષી સહસ્રભુજપાદુકા |
સંધ્યાવલિસ્ત્રિસંધ્યાખ્યા બ્રહ્માંડમણિભૂષણા ||૪૮ ||
વાસવી વારુણીસેના કુલિકા મંત્રરંજની |
જિતપ્રાણસ્વરૂપા ચ કાંતા કામ્યવરપ્રદા ||૪૯ ||
મંત્રબ્રાહ્મણવિદ્યાર્થા નાદરૂપા હવિષ્મતી |
આથર્વણિઃ શ્રુતિઃ શૂન્યા કલ્પનાવર્જિતા સતી || ૫૦ ||
સત્તાજાતિઃ પ્રમાઽમેયાઽપ્રમિતિઃ પ્રાણદા ગતિઃ |
અવર્ણા પંચવર્ણા ચ સર્વદા ભુવનેશ્વરી || ૫૧ ||
ત્રૈલોક્યમોહિની વિદ્યા સર્વભર્તી ક્ષરાઽક્ષરા |
હિરણ્યવર્ણા હરિણી સર્વોપદ્રવનાશિની || ૫૨ ||
કૈવલ્યપદવીરેખા સૂર્યમંડલસંસ્થિતા |
સોમમંડલમધ્યસ્થા વહ્નિમંડલસંસ્થિતા || ૫૩
વાયુમંડલમધ્યસ્થા પ્રોમમંડલસંસ્થિતા |
ચક્રિકા ચક્રમધ્યસ્થા ચક્રમાર્ગપ્રવર્તિની || ૫૪ ||
કોકિલાકુલચક્રેશા પક્ષતિઃ પંક્તિપાવની |
સર્વસિદ્ધાંતમાર્ગસ્થા ષડ્વર્ણાવરવર્જિતા || ૫૫ ||
શરરુદ્રહરા હંત્રી સર્વસંહારકારિણી |
પુરુષા પૌરુષી તુષ્ટિઃ સર્વતંત્રપ્રસૂતિકા ||૫૬ ||
અર્ધનારીશ્વરી દેવી સર્વવિદ્યાપ્રદાયિની |
ભાર્ગવી યાજુષીવિદ્યા સર્વોપનિષદાસ્થિતા || ૫૭ || [ભૂજુષીવિદ્યા]
વોમકેશાઽખિલપ્રાણા પંચકોશવિલક્ષણા |
પંચકોશાત્મિકા પ્રત્યક્ષંચબ્રહ્માત્મિકા શિવા || ૫૮ ||
જગજ્જરાજનિત્રી ચ પંચકર્મપ્રસૂતિકા |
વાગ્દવ્યાભરણાકારા સર્વકામ્યસ્થિતાસ્થિતિઃ || ૫૯ ||
અષ્ટાદશચતુષ્ટિપીઠિકા વિદ્યયાયુતા |
કાલિકાકર્ષણશ્યામા યક્ષિણી કિન્નરેશ્વરી || ૬૦ ||
કેતકી મલ્લિકાઽશોકા વારાહી ધરણી ધ્રુવા |
નારસિંહી મહોગ્રાસ્યા ભક્તાનામાર્તિનાશિની ||૬૧ ||
અંતર્બલા સ્થિરા લક્ષ્મીર્જરામરણનાશિની |
શ્રીરંજિતા મહાકાયા સોમસૂર્યાગ્નિલોચના || ૬૨ ||
અદિતિર્દેવમાતા ચ અષ્ટપુત્રાઽષ્ટયોગિની |
અષ્ટપ્રકૃતિરષ્ટાષ્ટવિભ્રાજદ્વિકૃતાકૃતિઃ || ૬૩ ||
દુર્ભિક્ષધ્વંસિની દેવી સીતા સત્યા ચ રુક્મિણી |

ખ્યાતિજા ભાર્ગવી દેવી દેવયોનિસ્તપસ્વિની || ૬૪ ||
શાકંભરી મહાશોણા ગરુડોપરિસંસ્થિતા |
સિંહગા વ્યાઘ્રગા દેવી વાયુગા ચ મહાદ્રિગા ||૬૫ ||
અકારાદિક્ષકારાંતા સર્વવિદ્યાધિદેવતા |
મંત્રવ્યાખ્યાનનિપુણા જ્યોતિઃશાસ્ત્રકલોચના ||૬૬
ઇડાપિંગળિકામધ્યસુષુમ્મા ગ્રંથિભેદિની |
કાલચક્રાશ્રયોપેતા કાલચક્રસ્વરૂપિણી ||૬૭ ||
વૈશારદી મતિશ્રેષ્ઠા વરિષ્ઠા સર્વદીપિકા |
વૈનાયકી વરારોહા શોણિવેલા બહિર્વલિઃ || ૬૮ ||
જંભિની જૃંભિણી જૃંભકારિણી ગણકારિકા | [જંભ]
શરણી ચક્રિકાઽનંતા સર્વવ્યાધિચિકિત્સકી || ૬૯ ||
દેવકી દેવસંકાશા વારિધિઃ કરુણાકરા |
શર્વરી સર્વસંપન્ના સર્વપાપપ્રભંજિની || ૭૦ ||
એકમાત્રા દ્વિમાત્રા ચ ત્રિમાત્રા ચ તથા પરા |
અર્ધમાત્રા પરા સૂક્ષ્મા સૂક્ષ્માર્થાર્થપરાઽપરા || ૭૧ ||
એકવીરા વિશેષાખ્યા ષષ્ઠિદેવી મનસ્વિની |
નૈષ્કર્મ્યા નિષ્કલાલોકા જ્ઞાનકર્માધિકા ગુણા ||૭૨ ||
સબંધ્વાનંદસંદોહા વ્યૂમાકારાઽનિરૂપિતા |
ગદ્યપદ્યાત્મિકા વાણી સર્વાલંકારસંયુતા || ૭૩ ||
સાધુબંધપદન્યાસા સર્વૌકો ઘટિકાવળિ |
ષટ્કર્મા કર્કશાકારા સર્વકર્મવિવર્જિતા || ૭૪ ||
આદિત્યવર્ણા ચાપર્ણા કામિની વરરૂપિણી |
બ્રહ્માણી બ્રહ્મસંતાના વેદવાગીશ્વરી શિવા || ૭૫ ||
પુરાણન્યાયમીમાંસાધર્મશાસ્ત્રાગમશ્રુતા |
સદ્યોવેદવતી સર્વા હંસી વિદ્યાધિદેવતા || ૭૬ ||
વિશ્વેશ્વરી જગદ્ધાત્રી વિશ્વનિર્માણકારિણી |
વૈદિકી વેદરૂપા ચ કાલિકા કાલરૂપિણી || ૭૭ ||
નારાયણી મહાદેવી સર્વતત્ત્વ પ્રવર્તિની |
હિરણ્યવર્ણરૂપા ચ હિરણ્યપદસંભવા ||૭૮ ||
કૈવલ્યપદવી પુણ્યા કૈવલ્યજ્ઞાનલક્ષિતા |
બ્રહ્મસંપત્તિરૂપા ચ બ્રહ્મસંપત્તિકારિણી || ૭૯ ||
વારુણી વારુણારાધ્યા સર્વકર્મપ્રવર્તિની |
એકાક્ષરપરાઽઽયુક્તા સર્વદારિદ્રભંજિની || ૮૦ ||
પાશાંકુશાન્વિતા દિવ્યા વીણાવ્યાખ્યાક્ષસૂત્રધૃત્ |
એકમૂર્તિસ્ત્રયીમૂર્તિમ્રધુકૈટભભંજિની || ૮૧ ||
સાંખ્યા સાંખ્યવતી જ્વાલા જ્વલંતી કામરૂપિણી |
જાગ્રંતી સર્વસંપત્તિઃ સુષુમ્ના સ્પષ્ટદાયિની || ૮૨ ||
કપાલિની મહાદંષ્મા ભ્રુકુટીકુટિલાનના |
સર્વાવાસા સુવાસા ચ બૃહત્યષ્ટિશ્ચ શક્વરી || ૮૩ ||
છંદોગણપ્રતિષ્ઠા ચ કલ્માષી કરુણાત્મિકા |

ચક્ષુષ્મતી મહાઘોષા ખડ્ગચર્મધરાડશનિઃ || ૮૪ ||
શિલ્પવૈચિત્ર્યવિદ્યોતા સર્વતોભદ્રવાસિની |
અચિંત્યલક્ષણાકારા સૂત્રભાષ્યનિબંધના || ૮૫ ||
સર્વવેદાર્થસંપત્તિઃ સર્વશાસ્ત્રાર્થમાતૃકા |
અકારાદિક્ષકારાંતસર્વવર્ણકૃતસ્થલા || ૮૬ ||
સર્વલક્ષ્મીઃ સદાનંદા સારવિદ્યા સદાશિવા |
સર્વજ્ઞા સર્વશક્તિશ્ચ ખેચરીરૂપગોચ્છિતા || ૮૭ ||
અણિમાદિગુણોપેતા પરા કાષ્ઠા પરા ગતિઃ |
હંસયુક્તવિમાનસ્થા હંસારૂઢા શશિપ્રભા || ૮૮ ||
ભવાની વાસનાશક્તિરાકૃતિસ્તાખિલાડખિલા |
તંત્રહેતુર્વિચિત્રાંગી મૈમગંગાવિનોદિની
વર્ષા ચ વાર્ષિકા ચૈવ ઋગ્યજુસ્સામરૂપિણી |
મહાનદી નદીપુણ્યાડગણ્યપુણ્યગુણક્રિયા || ૯૦ ||
સમાધિગતલભ્યાર્થા શોતવ્યા સ્વપ્રિયા ધૃણા |
નામાક્ષરપરા દેવી ઉપસર્ગનખાંચિતા ||૯૧ ||
નિપાતોરુદ્વયીજંઘા માતૃકા મંત્રરૂપિણી |
આસીના ચ શયાના ચ તિષ્ઠંતિ ધાવનાધિકા ||૯૨ ||
લક્ષ્યલક્ષણયોગાડ્યા તાદ્રૂપ્યગણનાકૃતિઃ |
સૈકરૂપા નૈકરૂપા સેંદુરૂપા તદાકૃતિઃ ||૯૩ ||
સમાસતદ્ધિતાકારા વિભક્તિવચનાત્મકા |
સ્વાહાકારા સ્વધાકારા શ્રીપત્યર્ધાંગનંદિની || ૯૪ ||
ગંભીરા ગહના ગુહ્યા યોનિલિંગાર્ધધારિણી |
શેષવાસુકિસંસેવ્યા ચપલા વરવર્ણિની ||૯૫ ||
કારુણ્યાકારસંપત્તિઃ કીલકૃન્મંત્રકીલિકા |
શક્તિબીજાત્મિકા સર્વમંત્રેષ્ટા ક્ષયકામના ||૯૬ ||
આગ્નેયી પાર્થિવા આપ્યા વાયવ્યા વ્યૂમકેતના |
સત્યજ્ઞાનાત્મકા નંદા બ્રાહ્મ બ્રહ્મ સનાતની ||૯૭ ||
અવિદ્યાવાસના માયાપ્રકૃતિઃ સર્વમોહિની |
શક્તિર્ધારણશક્તિશ્ચ ચિદચિચ્છક્તિયોગિની || ૯૮ ||
વારુણા મહામાયા મરીચર્મદમર્દિની |
વિરાટ્ સ્વાહા સ્વધા શુધ્દા નિરુપાસ્તિઃ સુભક્તિગા ||૯૯ ||
નિરૂપિતાદ્વયી વિદ્યા નિત્યાનિત્યસ્વરૂપિણી |
વૈરાજમાર્ગસંચારા સર્વસત્પથદર્શિની || ૧૦૦ ||
જાલંધરી મૃડાની ચ ભવાની ભવભંજની |
ત્રૈકાલિકજ્ઞાનતંતુસ્ત્રિકાલજ્ઞાનદાયિની || ૧૦૧ ||
નાદાતીતા સ્મૃતિઃ પ્રજ્ઞા ધાત્રીરૂપા ત્રિપુષ્કરા |
પરાજિતા વિધાનજ્ઞા વિશેષિતગુણાત્મિકા || ૧૦૨ ||
હિરણ્યકેશિની હેમબ્રહ્મસૂત્રવિચક્ષણા |
અસંખ્યેયપરાર્ધાંતસ્વરવ્યંજનવૈખરી || ૧૦૩ ||
મધુજિહ્વા મધુમતી મધુમાસોદયા મધુઃ |

માધવી ચ મહાભાગા મેઘગંભીરનિસ્ટના || ૧૦૪ ||
બ્રહ્મવિષ્ણુમહેશાદિજ્ઞાતવ્યાર્થવિશેષગા |
નાભૌ વહ્નિશિખાકારા લલાટે ચંદ્રસન્નિભા || ૧૦૫ ||
ભ્રૂમધ્યે ભાસ્કરાકારા સર્વતારાકૃતિર્હૃદિ |
કૃત્તિકાદિભરણ્યંતનક્ષત્રેક્ષ્યર્ચિતોદયા || ૧૦૬ ||
ગ્રહવિધાત્મિકા જ્યોતિર્જ્યોતિર્વિન્મતિજીવિકા |
બ્રહ્માંડગર્ભિણી બાલા સપ્તાવરણદેવતા || ૧૦૭ ||
વૈરાજોત્તમસામ્રાજ્યા કુમારકુશલોદયા |
બગલા ભ્રમરાંબા ચ શિવદૂતી શિવાત્મિકા || ૧૦૮ ||
મેરુવિંધ્યાદિસંસ્થાના કાશ્મીરપુરવાસિની |
યોગનિદ્રા મહાનિદ્રા વિનિદ્રા રાક્ષસાશ્રિતા || ૧૦૯ ||
સુવર્ણદા મહાગંગા પંચાખ્યા પંચસંહતિઃ |
સુપ્રજાતા સુવીરા ચ સુપોષા સુપતિઃ શિવા || ૧૧૦ ||
સુગૃહા રક્તબીજાંતા હતકંદર્પજીવિકા |
સમુદ્રવોમમધ્યસ્થા સમબિંદુસમાશ્રયા || ૧૧૧
સૌભાગ્યરસજીવાતુઃ સારાસારવિવેકદૃક્ |
ત્રિવલ્યાદિસુપુષ્ટાંગા ભારતી ભરતાશ્રિતા || ૧૧૨ ||
નાદબ્રહ્મમયીવિધા જ્ઞાનબ્રહ્મમયીપરા |
બ્રહ્મનાડી નિરુક્તિશ્ચ બ્રહ્મકૈવલ્યસાધનમ્ || ૧૧૩ ||
કાલિકેયમહોદારવીર્યવિક્રમરૂપિણી |
બડબાગ્નિશિખાવા મહાકબલતર્પણા || ૧૧૪ ||
મહાભૂતા મહાદર્પા મહાસારા મહાક્રતુઃ |
પંચભૂતમહાગ્રાસા પંચભૂતાધિદેવતા || ૧૧૫ ||
સર્વપ્રમાણા સંપત્તિઃ સર્વરોગપ્રતિક્રિયા |
બ્રહ્માંડાંતર્બહિર્વ્યાપ્તા વિષ્ણુવક્ષેવિભૂષિણી || ૧૧૬ ||
શાંકરી વિધિવક્તસ્થા પ્રવરા વરહેતુકી |
હેમમાલા શિખામાલા ત્રિશિખા પંચલોચના || ૧૧૭ || [પંચમોચના]
સર્વાગમસદાચારમર્યાદા યાતુભંજની |
પુણ્યશ્લોકપ્રબંધાડ્યા સર્વાંતર્યામિરૂપિણી || ૧૧૮ ||
સામગાનસમારાધ્યા પ્રોત્રકર્ણરસાયનમ્ |
જીવલોકૈકજીવાતુર્ભદ્રોદારવિલોકના || ૧૧૯ ||
તટિત્કટિલસત્કાંતિસ્તરુણી હરિસુંદરી |
મીનનેત્રા ચ સેંદ્રાક્ષી વિશાલાક્ષી સુમંગળા || ૧૨૦ ||
સર્વમંગળસંપન્ના સાક્ષાન્મંગળદેવતા |
દેહહૃદ્દીપિકા દીપ્તિર્જિહ્મપાપપ્રણાશિની || ૧૨૧ ||
અર્ધચંદ્રોલ્લસદંષ્ટ્રા યજ્ઞવાટીવિલાસિની |
મહાદુર્ગા મહોત્સાહા મહાદેવબલોદયા || ૧૨૨ ||
ડાકિનીડ્યા શાકિનીડ્યા સાકિનીડ્યા સમસ્તજુટ્ |
નિરંકુશા નાકિવંધા ષડાધારાધિદેવતા || ૧૨૩ ||
ભુવનજ્ઞાનિનિઃશ્રેણી ભુવનાકારવલ્લરી |

શાશ્વતી શાશ્વતાકારા લોકાનુગ્રહકારિણી || ૧૨૪ ||
સારસી માનસી હંસી હંસલોકપ્રદાયિની |
ચિન્મુદ્રાલંકૃતકરા કોટિસૂર્યસમપ્રભા || ૧૨૫ ||
સુખપ્રાણિશિરોરેખા સદદૃષ્ટપ્રદાયિની |
સર્વસાંકર્યદોષ ગ્રહોપદ્રવનાશિની || ૧૨૬ ||
ક્ષુદ્રજંતુભય ચ વિષરોગાદિભંજની |
સદાશાંતા સદાશુધ્ધા ગૃહચ્છિદ્રનિવારિણી || ૧૨૭ ||
કલિદોષપ્રશમની કોલાહલપુરસ્થિતા |
ગૌરી લાક્ષણિકી મુખ્યા જઘન્યાકૃતિવર્જિતા || ૧૨૮ ||
માયા વિદ્યા મૂલભૂતા વાસવી વિષ્ણુ ચેતના |
વાદિની વસુરૂપા ચ વસુરત્નપરિચ્છદા || ૧૨૯ ||
છાંદસી ચંદ્રહૃદયા મંત્રસ્વચ્છંદભૈરવી |
વનમાલા વૈજયંતી પંચદિવ્યાયુધાત્મિકા ||૧૩૦ ||
પીતાંબરમયી ચંચત્કસ્તુભા હરિકામિની |
નિત્યા તથ્યા રમા રામા રમણી મૃત્યુભંજની || ૧૩૧ ||
જેષ્ઠા કાષ્ઠા ધનિષ્ઠાંતા શરાંગી નિર્ગુણપ્રિયા |
મૈત્રેયા મિત્રવિદા ચ શેષ્યશેષકલાશયા || ૧૩૨ ||
વારાણસીવાસરતા ચાર્યાવર્તજનસ્તુતા |
જગદુત્પત્તિસંસ્થાનસંહારત્રયકારણમ્ || ૧૩૩ ||
ત્વમંબ વિષ્ણુસર્વસ્વં નમસ્તેસ્તુ મહેશ્વરિ |
નમસ્તે સર્વલોકાનાં જનન્ય પુણ્યમૂર્તયે || ૧૩૪ ||
સિધ્ધલક્ષ્મીર્મહાકાળિ મહાલક્ષ્મિ નમોડસ્તુ તે |
સદ્યોજાતાદિપંચાગ્નિરૂપા પંચકપંચકમ્ || ૧૩૫ ||
યંત્રલક્ષ્મીર્ભવત્યાદિરાદ્યાદ્ તે નમો નમઃ |
સૃષ્ટાદિકારણાકારવિતતે દોષવર્જિતે || ૧૩૬ ||
જગલ્લક્ષ્મીર્જગન્માતર્વિષ્ણુપત્નિ નમોડસ્તુ તે |
નવકોટિમહાશક્તિસમુપાસ્યપદાંબુજે || ૧૩૭ ||
કનવર્ણરત્નાડ્જ સર્વાભરણભૂષિતે |
અનંતનિત્યમહિષિ પ્રપંચેશ્વરનાયકિ || ૧૩૮ ||
અત્યુચ્છિતપદાંતસ્થ પરમવોમનાયકિ |
નાકપૃષ્ઠગતારાધ્યે વિષ્ણુલોકવિલાસિનિ || ૧૩૯ ||
વૈકુંઠરાજમહિષિ શ્રીરંગનગરાશ્રિતે |
રંગનાયકિ ભૂપુત્રિ કૃષ્ણ વરદવલ્લભે || ૧૪૦ ||
કોટિબ્રહ્માદિસંસેવ્ય કોટિરુદ્રાદિકીર્તિતે |
માતુલુંગમયં ખેટં સૌવર્ણચષકં તથા || ૧૪૧ ||
પદ્મદ્વયં પૂર્ણકુંભં કીરં ચ વરદાભયે |
પાશમંકુશકં શંખં ચક્રં શૂલં કૃપાણિકામ્ || ૧૪૨ ||
ધનુર્બાણ્ ચાક્ષમાલાં ચિન્મુદ્રામપિ બિભ્રતી |
અષ્ટાદશભુજે લક્ષ્મીર્મહાષ્ટાદશપીઠગે || ૧૪૩ ||
ભૂમિનીલાદિસંસેવે સ્વામિચિત્તાનુવર્તિનિ |

પદ્મ પદ્માલયે પદ્મ પૂર્ણકુંભાભિષેચિતે || ૧૪૪ ||
ઇંદિરેંદીવરાભાક્ષિ ક્ષીરસાગરકન્યકે |
ભાર્ગવિ ત્વં સ્વતંતેચ્છા વશીકૃતજગત્પતિઃ || ૧૪૫ ||
મંગળં મંગળાનાં ત્વં દેવતાનાં ચ દેવતા |
ત્વમુત્તમોત્તમાનાં ચ ત્વં શ્રેયઃ પરમામૃતમ્ || ૧૪૬ ||
ધનધાન્યાભિવૃદ્ધિશ્ચ સાર્વભૌમસુખોચ્છયા |
આંદોળિકાદિસૌભાગ્યં મત્તેભાદિમહોદયઃ || ૧૪૭ ||
પુત્રપૌત્રાભિવૃદ્ધિશ્ચ વિદ્યાભોગબલાદિકમ્ |
આયુરારોગ્યસંપત્તિરષ્ટૈશ્વર્યં ત્વમેવ હિ || ૧૪૮ ||
પરમેશવિભૂતિશ્ચ સૂક્ષ્માતૂક્ષ્મતરા ગતિઃ |
સદયાપાંગસંદત્તબ્રંદ્રાદિપદસ્થિતિઃ || ૧૪૯ ||
અવ્યાહતમહાભાગ્યં ત્વમેવાક્ષેભ્યવિક્રમઃ |
સમન્વયશ્ચ વેદાનામવિરોધસ્વમેવ હિ || ૧૫૦ ||
નિઃશ્રેયસપદપ્રાપ્તિસાધનં ફલમેવ ચ |
શ્રીમંત્રરાજરાજી ચ શ્રીવિદ્યા ક્ષેમકારિણી || ૧૫૧ ||
શ્રીંબીજજપસંતુષ્ટા ઐં ક્રીં શ્રીં બીજપાલિકા |
પ્રપત્તિમાર્ગસુલભા વિષ્ણુપ્રથમકિંકરી || ૧૫૨ ||
ક્લિંકારાર્થસવિત્રી ચ સૌમંગળ્યાધિદેવતા |
શ્રીષોડશાક્ષરીવિદ્યા શ્રીયંત્રપુરવાસિની || ૧૫૩ ||
સર્વમંગળમાંગળે શિવે સર્વાર્થસાધિકે |
શરણ્ય ત્ર્યંબકે દેવિ નારાયણિ નમોઽસ્તુ તે || ૧૫૪ ||
પુનઃ પુનર્નમસ્તેઽસ્તુ સાષ્ટાંગમયુતં પુનઃ |
સનત્કુમાર ઉવાચ |
એવં સ્તુતા મહાલક્ષ્મીર્બ્રહ્મરુદ્રાદિભિઃ સુરૈઃ |
નમરાર્તૃદીઽરનૈશ્ચ નિસ્સતૈર્ભોગવર્જિતૈઃ || ૧ ||
જેષ્ઠાજુશ્ચ નિઃશ્રીકૈ: સંસારાત્મપરાયણૈ |
વિષ્ણુપત્નિ દદૌ તેષાં દર્શનં દૃષ્ટિતર્પણમ્ || ૨ ||
શરત્પૂર્ણેંદુકોટ્યાભધવળાપાંગવીક્ષણૈઃ |
સર્વાન્ સત્વસમાવિષ્ટાંશ્ચક્રે કૃષ્ટા વરં દદૌ || ૩ ||
મહાલક્ષ્મીરુવાચ |
નામ્નાં સાષ્ટસહસ્રં મે પ્રમાદાઽપિ યઃ સકૃત્ |
કીર્તયેત્તત્કુલે સત્યં વસામ્યાચંદ્રતારકમ્ || ૪ ||
કિં પુનર્નિયમાજ્જપુર્મદેકશરણસ્ય ચ |
માતૃવત્સાનુકંપાહં પોષકી સ્યામહર્નિશમ્ || ૫ ||
મન્નામ સ્તુવતાં લોકે દુર્લભં નાસ્તિ ચિંતિતમ્ |
મત્પસાદેન સર્વેઽપિ સ્વસ્વષ્ટાર્થમવાપૃથ||૬||
લુપ્તવૈષ્ણવધર્મસ્ય મતેષ્ટવકીર્ણિનઃ |
ભક્તિપ્રપત્તિહીનસ્ય વંધો નામ્નાં જપોઽપિ મે ||૭||
તસ્માદવશ્યં તૈર્દોપૈર્વિહીનઃ પાપવર્જિતઃ |
જપેત્સાષ્ટસહસ્રં મે નામ્નાં પ્રત્યહમાદરાત્ ||૮||

સાક્ષાદલક્ષ્મીપુત્રોઽપિ દુર્ભાગ્યઽપ્યલસોઽપિ વા |
અપ્રયત્નઽપિ મૂઢઽપિ વિકલઃ પતિતોઽપિ ચ || ૯ ||
અવશ્યં પ્રાપ્નુયાદ્ભાગ્યં મત્રસાદેન કેવલમ્ |
સ્પૃહેયમચિરાદ્દેવા વરદાનાય જાપિનઃ |
દદામિ સર્વમિષ્ટાર્થં લક્ષ્મીતિ સ્મરતાં ધ્રુવમ્ || ૧૦ ||
સનત્કુમાર ઉવાચ |
ઇત્યુક્ત્યાંતર્દધે લક્ષ્મીર્વૈષ્ણવી ભગવત્કલા |
ઇષ્ટાપૂર્તં ચ સુકૃતં ભાગધેયં ચ ચિંતિતમ્ || ૧૧ ||
સ્વં સ્વં સ્થાનં ચ ભોગં ચ વિજયં લેભિરે સુરાઃ |
તદેતદ્ભવદામ્યદ્ય લક્ષ્મીનામસહસ્રકમ્ | યોગિનઃ પઠત ક્ષિપ્રં ચિંતિતાર્થાનવાપૃથ || ૧૨ ||
ગાર્ગ્ય ઉવાચ |
સનત્કુમારયોગીંદ્ર ઇત્યુક્ત્વા સ દયાનિધિઃ |
અનુગૃહ્ય યયૌ ક્ષિપ્રં તાંશ્ચ દ્વાદશયોગિનઃ || ૧૩ ||
તસ્માદેતદ્રહસ્યં ચ ગોપ્યં જપ્યં પ્રયત્નતઃ |
અષ્ટમ્યાં ચ ચતુર્દશ્યાં નવમ્યાં ભૈગુવાસરે || ૧૪ ||
પૌર્ણમાસ્યામમાયાં ચ પર્વકાલે વિશેષતઃ |
જપેદ્વા નિત્યકાર્યેષુ સર્વાન્યામાનવાપ્નુયાત્ || ૧૫ ||
ઇતિ શ્રીસ્કંદપુરાણે સનત્કુમાર સંહિતાયાં શ્રી લક્ષ્મી સહસ્રનામ સ્તોત્રમ્ ||